Downloaded From :http://cbseportal.com/

This Question Paper consists 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

Roll No. / अनुक्रमाङ्कः

Code No. 59/SS/O
गूढसंख्या

Set / स्तबकः **A**

# SANSKRIT SAHITYA
# संस्कृतसाहित्यम्
# (348)

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ____________________

Signature of Invigilators 1. ____________________
(निरीक्षकयोः हस्ताक्षरम्)
2. ____________________

**सामान्या निर्देशा :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।

2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।

3 वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।

4 समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।

5 उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।

6 स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या 59/SS/O-A नूनं लेख्या ।

7 समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।



Downloaded From :http://cbseportal.com/ Courtesy : NIOS

Downloaded From :http://cbseportal.com/

# SANSKRIT SAHITYA

# संस्कृतसाहित्यम्

# (348)

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)] [पूर्णाङ्काः (Full Marks) : 100

---

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे [A] भागे **10**, [B] भागे **10**, [C] भागे **10**, [D] भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

---

[A] दशानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) कालिदासः कस्य अलङ्कारस्य वर्णने निपुणः ।

(क) अर्थान्तरन्यासस्य (ख) उपमायाः

(ग) उत्प्रेक्षायाः (घ) वक्रोक्तेः

(2) सहस्रगुणम् उत्स्रष्टुं कः रसम् आदत्ते ।

(क) दिलीपः (ख) पृथिवी

(ग) रविः (घ) इन्द्रः

(3) द्वादशपञ्जरिकास्तोत्रानुसारं सन्निहिते मरणे किं न रक्षति ।

(क) गोविन्दः (ख) धनम्

(ग) डुकृञ् करणे (घ) पुत्रः

(4) कतिवारं महामदः भारतस्य लुण्ठनं कृतवान् ।

(क) दश (ख) एकादश

(ग) द्वादश (घ) त्रयोदश

(5) उत्तररामचरिते चित्रकारस्य नाम किम् ।

(क) अर्जुनः (ख) श्यामः

(ग) अष्टावक्रः (घ) रोहसेनः



Downloaded From :http://cbseportal.com/ Courtesy : NIOS

Downloaded From :http://cbseportal.com/

(6) अपरिणामोपशमो भवति कः ।

(क) लक्ष्मीमदः (ख) अलसः

(ग) यौवनम् (घ) इन्द्रियम्

(7) वक्रोक्तिजीवितस्य लेखकः कः ।

(क) वामनः (ख) भामहः

(ग) कुन्तकः (घ) रुद्रटः

(8) दरिद्रचारुदत्ते चारुदत्तस्य वसन्तसेनया सह प्रेमविनिमयः कस्मिन् नगरे अभवत् ।

(क) उज्जयिन्याम् (ख) अयोध्यायाम्

(ग) भोजप्रदेशे (घ) मगधे

(9) योगिराजः प्रथमवारं कदा समाधिं गतः ।

(क) विक्रमादित्यस्य काले (ख) महामदस्य काले

(ग) युधिष्ठिरकाले (घ) रामचन्द्रस्य काले

(10) विश्वनाथः कस्मिन् समये आसीत् ।

(क) चतुर्दशशतके (ख) त्रयोदशशतके

(ग) द्वादशशतके (घ) एकादशशतके

[B] दशानां यथानिर्देशम् उत्तराणि लिखत । 2×10=20

(1) महाभारतं कः लिखितवान् । तत्र कति पर्वाणि सन्ति । 1+1=2

(2) दिलीपस्य पत्न्याः नाम किम् । सा च कीदृशी आसीत् । 1+1=2

(3) ध्वनिप्रस्थानस्य आचार्यः कः । तद्विरचितम् अलङ्कारशास्त्रं किम् । 1+1=2

(4) कस्मिन् नगरे माघस्य जन्म अभवत् । स कथं बहुशास्त्रवित् कविः इति प्रसिद्धः । 1+1=2

(5) रामायणे कति काण्डानि सन्ति । तत्र मुख्यरसः कः । 1+1=2

(6) रामचन्द्रः कुत्र न आसक्तः कुत्र च स वाचस्पतिः । 1+1=2

(7) विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः इति कस्य सूत्रम् । कुत्र उपलभ्यते सूत्रम् इदम् । 1+1=2

(8) कलिङ्गः साहसिकः इति कस्या लक्षणाया उदाहरणम् । लक्षणाया लब्धस्य अर्थस्य किं नाम । 1+1=2

(9) शब्दस्य अर्थस्य उभयस्य प्राधान्यं कस्मिन् अलङ्कारे अस्ति । तस्यालङ्कारस्य उदाहरणं देयम् । 1+1=2

(10) अनातुरः इत्यत्र महाभुजः इत्यत्र च समासनिर्णयः कार्यः । 1+1=2



Downloaded From :http://cbseportal.com/ Courtesy : NIOS

Downloaded From :http://cbseportal.com/

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(1) रघुवंशमहाकाव्ये कवियशःप्रार्थिनः कवेः स्थितिं यथाग्रन्थं स्पष्टयत ।

(2) प्रस्रवणपर्वतं यथामति वर्णयत ।

(3) गुरुस्वरनियमान् वर्णयत ।

(4) वागर्थाविव इति प्रतीकोद्धृतं श्लोकं प्रपूर्य व्याख्यात ।

(5) दक्षिणदेशः कीदृशः इति शिवराजविजयानुसारेण प्रतिपादयत ।

(6) लौकिकानां हि साधूनाम् इति प्रतीकोद्धृतं श्लोकं सम्पूर्य व्याख्यात ।

(7) शुकनासनये यौवनस्वभावं वर्णयत ।

(8) रसस्य कति प्रकाराः इति ग्रन्थदिशा प्रतिपादयत ।

(9) अभिधावृत्तिं ग्रन्थदिशा वर्णयत ।

(10) राज्यतन्त्रे राजकुमारेण चन्द्रापीडेन कथम् आचरणीयम् इति प्रतिपादयत ।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(1) लक्ष्म्याः दुश्चरितं यथाग्रन्थं प्रतिपादयत ।

(2) बालिका कथम् आश्रमं प्राप्ता इति ब्रह्मचारिमुखेन वर्णयत ।

(3) उत्तररामचरितस्य नान्दीश्लोकः कः । नान्दीलक्षणमुक्त्वा समन्वयपूर्वकं श्लोकं व्याख्यात ।

(4) वृत्तपद्यस्य स्वरूपं भेदान् च सोदाहरणं स्वभाषया वर्णयत ।

(5) रूपकम् अनुप्रासः इत्यनयोः एकम् अलङ्कारं सोदाहरणं प्रतिपादयत ।



Downloaded From :http://cbseportal.com/ Courtesy : NIOS